योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०५०

पञ्चाशः सर्गः ५०

श्रीराम उवाच ।

ज्ञातं ज्ञातव्यमखिलं दृष्टं द्रष्टव्यमक्षतम् ।

परेण परिपूर्णाः स्मो ब्रह्मज्ञानामृतेन ते ।। १

पूर्णात्पूर्णमिदं पूर्णं पूर्णात्पूर्णं प्रसूयते ।

पूर्णेनापूरितं पूर्णं स्थिता पूर्णे च पूर्णता ।। २

लीलयेदं तु पृच्छामि भूयोबोधाभिवृद्धये ।

बालस्येव पिता ब्रह्मन्न कोपं कर्तुमर्हसि ।। ३

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।

विद्यमानमपि ब्रह्मन्दृश्यमानमपि स्फुटम् ।। ४

कथं मृतस्य वै जन्तोर्विषयं स्वं न पश्यति ।

जीवतश्च कथं सर्वं विषयं स्वं प्रपश्यति ।।

कथं घटादिबाह्यत्वमिन्द्रियाणि जडान्यपि ।

शरीरेऽनुभवन्त्यन्तःपुनर्नानुभवन्त्यपि ।। ६

अयःशलाकोपमयोर्घटादीन्द्रिययोः किल ।

अश्लिष्टयोरन्तरसौ कथं तन्नोदिता मिथः ।। ७

जानन्नपि यदेतान्वै विशेषाञ्छतधा पुनः ।

पृच्छामि तदशेषेण कथयस्वानुकम्पया ।। ८

श्रीवसिष्ठ उवाच ।

इन्द्रियाद्यपि चित्तादि घटाद्यपि न किंचन ।

पृथक् संभवतीहाङ्ग निर्मलाच्चेतनादृते ।। ९

गगनादपि याऽच्छा चित्तया रूपं स्वमात्मना ।

चित्त्वात्पुर्यष्टकत्वेन भाववृत्त्यैव भावितम् ।। १०

तदेव च प्रकृतितां गतं जगदवस्थितेः ।

तस्या अवयवाज्जातमिन्द्रियादि घटादि च ।। ११

पुर्यष्टकत्वमायातं यच्चित्तं स्वस्वभावतः ।

स्व एवावयवस्तस्मिन्घटादि प्रतिबिम्बति ।। १२

श्रीराम उवाच ।

जगत्सहस्रनिर्माणमहिम्नो दर्पणस्य च ।

पुर्यष्टकस्य भगवन्रूपं कथय कीदृशम् ।। १३

श्रीवसिष्ठ उवाच ।

अनाद्यन्तं जगद्बीजं यद्ब्रह्मास्ति निरामयम् ।

भारूपं शुद्धचिन्मात्रं कलाकलनवर्जितम् ।। १४

कलनोन्मुखतां यातमन्तर्जीव इति स्मृतः ।

स जीवः खलु देहेऽस्मिंश्चिनोति स्पन्दते स्फुटम् ।। १५

अहंभावादहंकारो मननान्मन उच्यते ।

बोधनिश्चयतो बुद्धिरिन्द्रदृष्टेस्तथेन्द्रियम् ।। १६

देहभावनया देहो घटभावनया घटः ।

एष एव स्वभावात्मा जनैः पुर्यष्टकं स्मृतः ।। १७

ज्ञत्वकर्तृत्वभोक्तृत्वसाक्षित्वाद्यभिपातिनी ।

या संविज्जीव इत्युक्ता तद्धि पुर्यष्टकं विदुः ।। १८

काले काले ततो जीवस्त्वन्योन्यो भवति स्वतः ।

भाविताकारयानन्तवासनाकणिकोदयम् ।। १९

पुर्यष्टकस्वभावेन कालेनाकारमृच्छति ।

यथावासनतः सेकाद्बीजं पल्लवतामिव ।। २०

आकारोऽहं शरीरादि स्थावरादि चरादि च ।

नाहमाद्यश्चिदात्मेति मिथ्या ज्ञानेन चेतति ।। २१

भ्रमत्येव जगज्जीवो वासनावलितश्चिरम् ।

ऊर्ध्वाधोगमनैरब्धौ काष्ठं वीचिहतं यथा ।। २२

कश्चिद्विशुद्धजातित्वाद्भवबन्धादनन्तरम् ।

बुद्ध्वात्मानं समभ्येति पदमाद्यन्तवर्जितम् ।। २३

कश्चित्कालेन बहुना भुक्तयोनिगणातुरः ।

आत्मज्ञानवशादेति परमं पदमात्मनः ।। २४

एवंरूपश्च सुमते जीवो यातः शरीरताम् ।

नेत्रादिना घटाद्यन्तर्यथा वेत्ति तथा श्रृणु ।। २५

चित्त्वस्य कलनान्तस्य संप्रयातस्य जीवताम् ।

मनःषष्ठेन्द्रियग्रामो देहोऽयमवतिष्ठते ।। २६

यदान्यः सर्वदेहेभ्यः खे पतत्यक्षरूपिणा ।

तदा तज्जीवसंस्पर्शाज्जीवात्मैकत्वमृच्छति ।। २७

बाह्यार्थवेदने नित्यं संबन्धोऽक्षस्य कारकः ।

समन्वितस्य चित्तेन न मुक्तस्य कदाचन ।। २८

यद्यदच्छतरं तस्मिन्नभःस्थं प्रतिबिम्बति ।

जीवेन भवति श्लिष्टो बहिर्जीवोऽप्यजीवति ।। २९

निघृष्टनवरत्नाभे यदा नयनतारके ।

तदा तयोर्बाह्यगतः पदार्थः प्रतिबिम्बति ।। ३०

जीवेन भवति श्लिष्टः प्रतिबिम्बतया ततः ।

जीवज्ञेयत्वमायाति बाह्यं वस्त्विति राघव ।। ३१

यत्संश्लेषमुपायाति तद्बालोऽपि हि विन्दति ।

पशुर्वा स्थावरो वापि जीवः कस्मान्न वेत्स्यति ।। ३२

अच्छस्य नयनस्याथो रश्मयो जीववेष्टिताः ।

क्रोडीकुर्वन्त्यलं दृश्यं जीवस्तत्त्वेन विन्दति ।। ३३

एष एव क्रमः स्पर्शे संबन्धः प्रत्ययोद्भवः ।

रसे गन्धे च कथितो जीवसंस्पर्शसंभवः ।। ३४

शब्दस्त्वाकाशनिष्ठत्वात्कर्णाकाशगतः क्षणात् ।

जीवाकाशं विशत्यन्तरित्थमिन्द्रियसंविदः ।। ३५

श्रीराम उवाच ।

दृश्यते मानसादर्शे यन्त्रदार्वौदरेषु तत् ।

प्रतिबिम्बितमेतन्मे ब्रूहि ब्रह्मन्किमात्मकम् ।। ३६

श्रीवसिष्ठ उवाच ।

अत्यन्तजडयोरेव जीवयोरिव तन्मिथः ।

प्रतिबिम्बं दृशो भ्रान्ति विद्धि वेद्यविदां वर ।। ३७

तावन्मात्रं जगत्त्वेतद्विश्वासो मा तवास्त्विह ।

अहमित्यादिस्तरङ्गो वर्तमानं सदा जलम् ।। ३८

पराम्भोधौ तु नास्त्येव देशकालक्रियादिकम् ।

तन्मयैकतया नित्यमात्मा सर्वत्र सर्वगः ।। ३९

नित्यमसक्तमतिर्मुदितात्मा

शान्तमृषासुखदुःखविदन्तः ।

तिष्ठ निविष्टमतिः समताया-

मस्तसमस्तभवामयमायः ।। ४०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० निर्वाणप्रकरणे पूर्वा० अक्षसंवेदनविचारयोगोपदेशो नाम पञ्चाशः सर्गः ।। ५० ।।